तव वनवासोऽनुचितः पितृमरणशुचं विसृज किं तपसा सफलय यौवनमेतत्सममनुरक्तेन सुतनु म
या ९ यः सावसरोऽपि रसो निरंतरं नीयते प्रबंधेषु अतिमहतीं वृद्धिमसौ तथैव वैरस्यमायाति १८
योयस्याव्यभिचारी सगुणादिस्तद्विशेषणं क्रियते परिहरयितुं छेदो यत्र स तद्धानिरिति ज्ञेयः १५ क्व
नु यास्यति वराकास्तरुकुसुमरसैकलालसा मधुपाः भस्मीकृतं वनं तद्दवदहनेनैतितीव्रेण १९ ॥
ना

सपदार्थस्याव्यभिचारी नित्यस्थः सगुणादिस्तस्य विशेषणतया यत्र क्रियते स दोषस्तद्धानिरिति ज्ञेयो यदव्य-
भिचारी तर्हि किमर्थं क्रियत इत्याह परिहरयितुं छंदस्तस्य हि छंदः पूरणमात्रमेवार्थ इति १५ उदाहर-
णम् क्वेति अत्र दवदहनस्यातितीव्रेणेति विशेषणाच्छंदःपूरणार्थमेव तत्राव्यभिचारादिति १९ ॥ १२·

अथातिमात्रः अतिहरमिति योऽर्थो लोकप्रसिद्धां मात्रां परिमाणमतिहरमतिक्रान्तः उल्लंघितः सोऽतिमात्रोऽर्थ
दोषः उदाहरणम् तवेत्याद्युत्तरार्द्धं अत्राम्बुलदानां ऽर्थो मात्रां त्यक्तवान् पयोऽत्ययपूर्णाभूयस्त्वायहस्तीकरणेनत
प्रलयजलदवत् जगत्प्लावनं ९ अथ यत्पूर्वमुक्तं तत्कारणमन्यथा कौ चतितदाह अत्यन्तमिति असंबद्धा
र्थतामहान्दोषस्तस्यापवादोऽयं यत्र परकीयमतमतिशायेनासंबद्धं प्रतिपादयितुमन्यदात्मीयमभिष्टमसं

अतिहरमतिक्रान्तो मात्रां लोके तिमात्र इत्यर्थः तवविरहे हरिणाक्ष्याः प्लावयति जगन्ति नयनाम्बु ९
अत्यन्तमसंबद्धपरमतमभिधातुमन्यदभिष्टं संगतमिति यद्व्याख्यातम् साप्युक्तिर्न दोषाय ९ कि
मिदमसंगतमस्मिन्नादावन्यत्र यथा न्यदं तेतच यत्नेनोमामाषाः स्फुटमेते कोऽद्भवाजाताः ९८

बद्धमर्थं वक्तावक्ति तत्राप्युक्तिरसंगततानदोषाय अथ कथं तेनासंबद्धेन परमतस्यासंबद्धता प्रतिपाद्यते
इत्याह संगतमिति इति इदं तो यत्नस्तस्यासंबद्धस्याभिष्टमेव संगतं सद्दृशतया दर्शयितं ९ उदाहरणे
कश्चिदसंबद्धं परवचनं दृष्टिपन्नाह अस्मिन्वस्तुनि किमिदमसंगतं भवतोच्यते कुतः आदौ प्रारंभे स्तनयोर्ते
च निर्गमे चान्यदिति किमिवासंबद्धमिति तत्सदृशमाह यथा मामाषाउ मां कोऽद्भवाश्चोत्पन्नाः इत्यसंबद्धं एवं तत्र वा ॥ ४२ ॥

काल भूयोप्याह अभिधेयस्येति यत्र वक्तुरुन्मादो मौर्ख्यमुत्कण्ठा च दोषः स्यात्तत्र तथ्यमयथार्थं तादृगुपपन्नापि
१२१ निकाममतिशयेनोपपन्ना युक्ता स्वस्थस्य ह्यन्यथा वचनं दोषायोन्मत्तादीनां तु तदेव भूषायै १९ यत्र उदाह
१२ रणानि यथाक्रममाह भ्रुकुटीति १ उन्मादे २० किमिति ३ ति मौर्ख्ये २१ हे इति १ उत्कण्ठाया अत्र गिरि

अभिधेयस्य तथ्यं तदनुपपन्नं निकाममुपपन्नं यत्र स्युर्वक्तुरुन्मादो मौर्ख्यमुत्कण्ठा १९ भ्रु।
कुटिमिव यामि गिरयः स्नातो दृक्किंनापिबामि विद्युत् हृदि हरिद्धिरण्यगर्भामतु यास्येन नृत्यामि २०
किं मां ब्रवीषि मूर्ख पश्ये दशशिरसमेव ननु तिमिरे स्वल्पाङ्कुरयोगं पश्यामसा त्वं न पश्यसि २१
हे हे सदेहि कान्तो सा मे भवता हतेति किं मिथ्या ननु गतिरियं नदीया वाणी सैव वेयमनिमेष
या २२ ॥

भाजनं वर्क्रिस्नानमाकाशपानमुज्ज्व- दिशुत्वञ्च नृत्यानि मिय स्पर्शीनलत्वं गयस्य।
स्वल्पाङ्कुरत्वं तस्य चापं कारेणादर्शनं तथाहे से तु कान्ताहरणं च सर्वमेवासंबद्धमुन्मत्तमूर्खोत्कै।
ण्ठोक्तत्वाच्चावैव २२ ॥

१२१

एवंसर्वोपमालंकारसाधारणान्दोषानभिधायेदानींकेवलोपमादोषानाह सामान्येति ज्ञैयम्यभेदस्योप॰
मायाइत्येते सामान्यशब्दभेदादयश्चत्वारोदोषास्तेचनासम्यगपितस्फुटाएवअत्रचस्वरूपोपादानेसत्यपि
तेचत्वारइति गृहणाद्यन्येपाविप्रभृतिभिरुक्तं यथालिंगवचनभेदोहीनताऽधिकाऽसंभवोविपर्ययोः
साहृश्यमिति सप्तोपमादोषास्तत्रलिंगवचनभेदाववन्यान्युपमानोपमेययोर्यथा भाद्भिताः सक्तवोरा
जन्मुक्ताः फलवृक्षइव परमान्नेवनिस्पृहाः पीनलाः परकार्यवत् उपमेयाद्उपमानस्ययत्रान्यानि ।

सामान्यशब्दभेदोवैषम्यमसंभवोऽधिकत्वंच इत्येतेचत्वारोदोषानासम्यगुपमायाः २३

विशेषणानिसाहीनताययथा समाहृताकंपिनपीनवासाविधत्तमलीलंशशिभासिशंखं यदुप्रवी
रः प्रगृहीतशार्ङ्गःसेंद्रायुधोमेघइवावभासे एवंयत्रोपमेयादुपमानस्याधिकानि विशेषणानि
तदाधिक्यं यथा सपीतवासाःप्रगृहीतशार्ङ्गोमनोज्ञभीमंवपुराप कृष्णः शतहृदेंद्रायुधवा
न्निशायांसंसृज्यमानः शशिनेवमेघः अत्रोपमानेमेघे शशियोगोऽधिकः यत्रविनैवयद्यर्थ ।
मसंभवद्विशेषणमुपमानं क्रियतेसोऽसंभवः यथा निपेतुरास्यादिवतस्यदीप्ताः शरायनुमेंऽत ।

लमध्यभाजः ज्वाज्वल्यमाना१ ॥

ववारिधारादिनार्हभाजः परिवेषिणोर्कात् नहिवारिधाराणामयथार्थज्ञात्वस्य मानत्वं दृश्यते विविंबा
द्वावारिधारापतनेसंभवति यत्रोपमेयाद्धीनमल्पत्वं चोपमानं क्रियते सो विपर्ययरूपत्वाद्धीने यथा
स्फुरंतिनिखिला नीलेतारकागगने निशि भास्करस्याभीषुसंस्पृष्टाः कृमयः कर्दमे यथा अल्पत्वे
यथा ॥ अयं पद्मासनासीनश्चक्रवाको विराजते युगादौ भगवान्ब्रह्मा विनिर्मित्सुरिव प्रजाः
यत्रोपमानोपमेययोः साम्यं नास्ति तदसादृश्यं यथा वनेष्वनस्मिन्वनिता विहारिणः प्रभि
न्नदानार्द्रकटाः मतंगजाः विचित्रवर्हाभरणाश्च वर्हिणो वभुर्दिवीवामलविग्रहा ग्रहाः अ
त्र नाकिंचित्कैर्निनां मयूराणां च यद्वै सादृश्यमस्तीति तदेतन्निरस्तं यत्तुष्मत्वावरणवामीसंख्याद
काभेदाः नत्वन्येन तथा हि सामान्यशब्दभेदं विना लिंगवचनभेदमात्रे नदुष्टमिह हि का दुष्ट
ता यथा अमन्दाभूषणांशुभः शशीमौलक्ष्मेव शोषितः पराक्रमः परिभवे वैयात्ये स्वरतेषिव
किंचालिंगवचनभेदे दोषत्वं नाश्रीयमाणे कालकारकविभक्तिभेदानाश्रिताः सामान्यशब्दभे
देत्वतेपि संगृह्णीतास्तथा हीननाधिकवचोपमानोपमेयसाम्याभावादोषत्वेनाश्रिते तपरेणानत्वेच
वैषम्यमेवोभयदोषसंग्राहकमेकसूत्रकम ॥ १२२

स्माभिस्तथा योपि हीनताधिक्यविशिष्टो विपर्ययउक्तः सोपिनतावन्मात्रेणादोषदेन्वरनिप्रसंगादपि
त्वप्रसिद्धितएवान्यथाहिनिंदास्तनीयत्रचिकीर्षितेभवतः तत्रापियथाक्रमेनिकृष्टस्योत्कृष्टस्य
चोपमानस्यदुष्टत्वंस्याद्यथा चतुरस्रबीजनवचनेनविनिवारितवासराविनोदेन निशिचंडालर
वाधमाद्यतिवियोगिनीस्तनः उत्तमोयथा जितास्रपत्नान्तुदायंयेन्वासहविराजते यथाहापि
तदैत्येंद्रःश्रियासाकंजनार्दनः नचात्रकाचिदुष्टतापरस्परथोयत्रोपमानत्वेनतप्रसिद्धः ससाद
श्यपस्तत्र्यापिनकर्त्तव्यः तथाहिसिंहादधिकोपिशरभः शौर्येणोपमानेनकेनचिन्निवद्धः
असादृश्यस्यतुदोषत्वमुपमानलक्षणेनैवनिरस्तत्वात् इहोपादानमनर्थ
कंकोहिलातोपमालक्षणः सादृश्याभावेउपमांकुर्वीततस्मादेत
न्निरासाच्चत्वारएवामीदोषाः नतुसप्तेतिस्थितमतएवना
सम्यगित्युक्तं २३ ॥ ॥

काले
१२३
123

इदानीमेतेषामेव दोषाणां लक्षणमाह तेष्विति सोऽयं सामान्यशब्दभेदाख्यो दोषः प्रवृत्तयोरुपमा
नोपमेययोः सामान्यवाचिपदं यावन्न भग्नं तावद् उपपन्नउपमाने योजयितुं वाचकीकर्तुं न शक्यते २६
अथ सामान्याभिधायिपदभेदे हेतुमाह तदिति तत्सामान्याभिधायिपदं लिंगादीनामन्यथात्वाद्भेदेतो
त्पन्नानुपमायां भिधेयेन न युक्तं हि वैषम्यमेव दत्तत्किमस्य पृथक्पाठेनेत्याह उभयोरुपमानोपमेय।
योः समानयोरिति वैषम्ये पुनरुभयोस्समानेऽपि तेन हि लिंगादिभेदप्रवत्स्वरूपेणाकिंचित्करत्वादाह भि
न्नसामान्यभेदः सोऽयं यत्रापरत्र शब्देन योजयितुं नाभग्नं तत्सामान्याभिधायिपदं २६ तल्लिंगका
लकारकविभक्तिवचनान्यभावसद्भावात् उभयोः समानयोरितिन सोऽभिधेयेन किंचित् २१ वे
इक्लेव सगौरी वा तेरवजगामयः समुन्नतम् दहतु शिखीव समकामं जीवयसि स्मयेव मामालि २९
येन किंचित्तत्त्वमवधारणे तत्सामान्याभिधायिपदं लिंगादिभेदेपि किंचिदेवाभिधेयेन न सर्वत्र तत्रायमे
वतस्य भेदस्तस्यैव दोषो न सर्वत्र २१ एतदुदाहरणानि यथाक्रममाह चंद्रकलेति कान्ति रहिते रहिणी
मलीमसे अत्र लिंगव्यत्ययश्चन्द्रकला सगौरी तथा यशसोः स्त्रीत्वे लिंगभेदे यथावान्नागच्छति तथा मो
समुन्नतम्न्योऽजगामेति कालभेदे भूतकालावर्त्तमानेन नभयः समुन्नतमानेयोज्यते दहतु शिखीव स
कामिति कारकभेदे विधि विशिष्टो हि कर्ता कर्त्तमात्रेणाशिखिना प्रमितो न जीवयसि स्मयेव मामा

लीलेति विभक्तिभेदे मध्यमपुरुषो हि प्रथमपुरुषेण विपरिणम्योपमाने योज्यते २८ ॥

१२३

कुवलयेति कुवलयदलमिव दीर्घे तव नयने इति वचनभेदे दीर्घे इति द्विवचनान्तं नयने एकवचनान्तं तत्कृत्वा योज्यते न
त्वेवं लिंगादिभेदे दोषीकृते महाकविलक्ष्ये तान्हंसमालाः शरदीव गंगामित्यादिके कालादिभेदस्य विद्यमानत्वा
न्नायशः सर्वमेव हृद्यत्वेनत्याह इत्ययत्नमित्यादिनरघुवाथवोणापुकृतानां तावदयं स्वव्यकृत एव दोषस्तेनोऽस्माभिरुक्तः उ
क्तं च पूर्वमेव काव्यालंकारायच्छ्रेयः क्रियते यथा प्रयुक्तानि विद्वद्भिरपि प्रयुक्तस्येत्यनेन न दोषस्याप्यपरिहार्यता।

कुवलयदलमिव दीर्घे तव नयने इत्ययं त्वसत्यः (के) प्रयुक्तानां तावद्दोषो विद्वद्भिरपि प्रयुक्तस्य २७ अकृत
विशेषणमेकं यत्स्यादुभयोस्तदन्यवैषम्यं संभवति कल्पितायामुपमायायाचनात्यत्र २८ विपरीत
रते स्तनतोरायस्तायां विभाति मुखमस्याः श्रमवारिबिन्दुजालकलाञ्छितमिव कमलमुत्फुल्लं २९

माह २७ वैषम्यमाह अकृतेति उभयोरुपमानोपमेययोर्मध्यादेकमुपमानमुपमेयं वा निर्विशेषणं भवेत्तदस्या
कृतविशेषणस्य कृतविशेषणेन सह वैषम्यं तच्च कल्पितायामुपमायां चोपमायां संभवति २८ विपरीतर
त इति इवशब्दो भिन्नक्रमे कमलशब्दात्परो द्रष्टव्यः इह चोपमेयस्य मुखस्य श्रमवारिबिन्दुजालकलाञ्छितत्ववि
शेषणाकृतं कमलस्योपमानस्य न किंचिद्विषणाय नलकणानिकरवाचितत्वादिकं कृतं कल्पितोपमेयं २९

काले उदाहरणमाह मुक्ताफलेति अत्रोपमानस्येन्दुबिंबस्य मुक्ताफलजालचितमिति विशेषणं कृतं न तच्च
१२५ तस्योपमेयस्य मुखस्याविकारिणावितत्वादि १ अथासंभवः उपमानमिति सहत्वनेन प्रकारेणासं
125 भवो नाम दोषो यत्रोपमानमसंभवद्विशेषणमसंभाव्यविवक्षितधर्मकमपि नियमान्निश्चयेन सं

मुक्ताफलजालचितं यदीन्दुबिंबं भवेन्नतस्तेन विपरीतरते सुतनोरुपमीयेताननं तस्याः १
उपमानं यत्र स्यादसंभवद्विशेषणं नियमात् संभूतमयथार्थं विज्ञेयो संभवः स इति ३१ स
तन्वीयं विमलांबरलसत्सूक्ष्ममृणालमूललालित्या अजलप्रकृतिरहस्थितमिवागगनन
लिनीव ३२ ॥

भूतं तद्विशेषणमुक्तं स्यात् ननु तर्हि पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थमि
त्याद्यपि दुष्टं स्यादित्याह यद्यथार्थं विकल्पं यदि क्रियते सयथार्थे तन्नदोषः ३१ उदाहरणमाह
स्तनत्रितिति अत्र विशेषणानुपपत्तिनीलगगननलिन्याः समानेपरं यदि गगने नलिनी संभवेत्तदा
तन्व्याः सदृशी भवेदत्यथार्थोऽविनाडुष्टता ३२ ॥ १२५

अथाप्रसिद्धिः उपमानतयेति यत्किमपि वस्तु लोके वाच्यस्योपमेयार्थस्योपमानतया न प्रसिद्धमथ च तथा क्रि
यते सा ऽप्रसिद्धिर्दोषः कदाचिद्वाच्येन सह विसदृशत्वादथवा नादृशत्वमपि यदि न प्रसिद्धं कथं क्रियते इत्या
ह उत्कटसामान्यतयाति सादृश्यादित्यर्थः ५५ उदाहरणमाह पद्मेति इह ब्रह्मकेशवचन्द्राणां क्रमेण पद्मास
नत्वेन श्यामत्वेन सितत्वेन स्थितत्वेन च चक्रवाकश्वपचबकाः समाना अपि न तूपमानत्वेन प्रसिद्धाः य

उपमानतया लोके वाच्यस्य न तादृशं प्रसिद्धं यत् क्रियते यत्र तदुत्कटसामान्यतयाप्रसिद्धिः सा ५५
पद्मासनसन्निहितो भाति ब्रह्मेव चक्रवाकोऽयं श्वपच श्यामं वंदे हरिमिंदुसितो बकोयमिति ५६

अत्र प्रसिद्धिस्तत्र भवत्येवं यथा नमामि शंकरं काशसंकाशं शशिशेखरं नमोऽनन्ताय गीर्वाणैरतिलीलो
लाय विष्णवे इत्यादि ननु कथं भवंतमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि कथं न मन्युर्ज्व
लयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः इत्यादिषूपममत्र ह्येकत्र विधिरपरत्र निषेधो यथा
शमीतरुमग्निर्दहत्येवं त्वां मन्युः कथं न दहतीति सत्यं प्रथममौपम्यविहिते पश्चादुपमेयप्रतिषेधेन किं

काल
१२५
125

अथ सर्वमेव शास्त्रोक्तमुपसंहरन्नाह शब्दार्थयोरिति इति पूर्वोक्तेन युक्तिमता प्रकारेण शब्दार्थयोर्दोषा
न् गुणांश्च निपुणः प्रवीणः कविर्निरूप्य पर्यालोच्य किंभूतान् विभक्तरूपान् विभागेन स्थितरूपान्
शब्दस्य हि वक्रोक्त्यादयः पंच गुणाः दोषास्तु समर्थादयः षट् अर्थस्य पुनर्गुणाः वास्तवादयस्तथा
र्थदोषास्तु अपहेतुत्वादयो नव ततस्त्वासारदोषान् विसृज्य नु परमुत्कृष्टसारमलंकारानादधानो रच
यन् किंभूतः सन् समाहितः सावधानेन मनो यस्य स तथाविधः अनवधाने हि महाकवीनामपि स्खलि।

शब्दार्थयो रीतिं निरूप्य विभक्तरूपान् दोषान् गुणांश्च निपुणो विसृजन्नसारं सारं समाहितमनाः
परमादधानः कुर्वीत काव्यमविनाशि यशोऽपि गंतुं ३५ इति श्रीकाव्यालंकारे एकादशोऽध्यायः ॥

तेभवति किमर्थं पुनरेवं कुर्वीतेत्याहाविनाश्यविनश्वरं यशः शाश्वतमिति अत्र च वास्तवादीनां चतुर्णा
मपि ये सहोक्त्यादयः प्रभेदाउक्तास्ते वाकल्पितो नेपुनरेतावंत एव उक्ताश्च न कुत्र इत्तमाणां अवहीनय
नैदीमतिकहविपुणाकृता जेविमनापि प्राणेशुत्यावासकरवाणीय ततो यावंतो हृदयावर्जका अर्थ
प्रकारास्तावंतोलंकारास्तेनेमान्यपि सिद्धं भवति यथा तातेनदत्तमपारदंहोचितस्तत्स्वं स्वसंकृतमत
तोषतः सोत्कडः सहशीतवातातपनक्लेशानन्तमेतपः ध्यातं वित्तमहर्निशं नियमितप्राणैस्तशंभोः
पदंतत्तत्कर्मकृतं परानतिपरैस्तैस्तैः फलैर्वंचिताः ॥ इति नमिसाधुविरचिते रुद्रटालंकारटिप्पनकेः ११

ननुकाव्यकरणे कवेः पूर्वमेव फलमुक्तं श्रोतॄणां तु किं फलमित्याह ननु इति ननुशब्दः इह प्रतिवचने
काव्येन हेतुना चतुर्वर्गे धर्मार्थकाममोक्षलक्षणे ऽवगमो ऽवबोधः क्रियते ननु तत्र धर्मादिशास्त्राण्येव हे
तवः सन्ति किं काव्येनेत्याह लघु मृदु चेति क्रियाविशेषणे शीघ्रं कोमलोपायं च यथा भवतीत्यर्थः तथापि धर्मा
दिसारसंग्रहशास्त्रेभ्यो लघु मृदु च भविष्यतीत्याह सरसानां शृङ्गारादिप्रियाणां ननु धर्मादिशास्त्रेभ्यस्ते
षामपि किं न भवतीत्याह नीरसेभ्यः शास्त्रेभ्यो हि यस्मात्ते सरसास्त्रस्यन्ति बिभ्यति । ततः किमित्याह तस्मा

ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे लघु मृदु च नीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः ।
म॰ तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तं उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात् २ ॥

दिति गतार्थं नन्वेवं सति सरसार्थमेव काव्यं स्यान्न तु नीरसार्थमिति नास्य सार्वजनीनत्वं स्यान्नैष दोषः
सरसानां प्रवृत्तस्तेषामस्माभिरुक्तो न तु नीरसप्रवृत्तिनिषेधः कृत इति तेऽपि प्रवर्तन्त एव अथालंका॰
रमध्य एव रसा अपि किं नोक्ता उच्यते काव्यस्य हि शब्दार्थौ शरीरं तस्य च वक्रोक्तिवास्तवादयः कटककु॰
ण्डलादय इव कृत्रिमा अलंकारा रसास्तु सौन्दर्यादय इव सहजा गुणा इति भिन्नस्तत्प्रकरणारम्भः २ ॥

काले
१२९
126

अथ कथमेते रसास्तानेवोद्दिशति शृंगारेति गतार्थं नवानां शृंगारस्य प्राधान्यख्यापनार्थः प्रागुपन्यासः इ
तिशब्द एवंप्रकारार्थः एवंप्रकारा अन्येपि भावा रतिनिर्वेदस्तंभादयः सर्वेपि रसा वोद्धव्याः तत्र रत्याद
यः स्थायिनो निर्वेदादयो व्यभिचारिणः स्तंभादयः सात्विकास्तद्यथा रतिर्हासश्च शोकश्च क्रोधोत्सा
हौ भयं तथा जुगुप्सा विस्मयश्चमाः स्थायिभावा रसाश्रयाः निर्वेदोथ तथा ग्लानिशंकासूयामद
श्रमाः आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो वि

शृंगारवीरकरुणबीभत्सभयानकाद्भुता हास्यः रौद्रः शांतः प्रेयानिति मंतव्या रसाः सर्वे इ

षाद औत्सुक्यं निद्रापस्मार एव च सुप्तं प्रबोधो मर्षश्चाप्यवहित्थस्तथोग्रता मतिर्व्याधिस्तथोन्माद
स्तथा मरणमेव च त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः त्रयस्त्रिंशदिमे भावाः समाख्याता
स्तु नामतः स्तंभः स्वेदोथ रोमांचः स्वरभेदोथ वेपथुः वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः
तत्र शृंगारादिषु रत्यादयो यथासंख्यं भवंति निर्वेदस्तंभादयस्तु सर्वेष्विति इ ॥ १२९

ननु कथं तर्हि निर्वेदादयो रसतां यान्तीत्याह रसनादिति आचार्यैर्भरतादिभिरेषां स्थायिभावानां रसना
दास्वादनाद्धेतो रसत्वमुक्तं केषामिव मधुराम्लादीनामिव मधुरादयो ह्यास्वाद्यमानाः सन्तो रसतां याती
त्युक्तं च अनेकद्रव्यसंयुक्तैर्व्यञ्जनैर्बहुभिर्युतैः आस्वादयन्ति भुञ्जाना भक्तं भक्तभुजो यथा भावाभिनय
संबद्धान् स्थायिभावांस्तथा रसान् आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः स्यादेतत् स्थायिभा
वानामेव रसत्वं भविष्यतीत्याह निर्वेदादिष्वपि तद्रसत्वं निकाममस्तीति हेतोस्तेपि रसा ज्ञेयाः यस्य तद्

रसनाद्रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः निर्वेदादिष्वपि तन्निकाममस्तीति तेपि रसाः
४ व्यवहारः पुंनार्योरन्योन्यं तद्रक्तयो रतिप्रकृतिः शृङ्गारः स द्वेधा संभोगो विप्रलम्भश्च ५ सं
भोगः संगतयोर्वियुक्तयोर्यस्तु विप्रलम्भोसौ पुनरप्येष द्वेधा प्रच्छन्नश्च प्रकाशश्च ६ ॥

परिपोषं नु गतात्तस्य भावाप्य वते अयमाशयो यं प्रकारस्य यद्रतं नास्ति सा कापि चित्तवृत्तिर्या परिपोषं
गता न रसो भवति भरतेन सहृदयावर्जकत्वप्राचुर्यात्संज्ञा चाभिताष्टौ नव वा रसा उक्ता इति ४ अथ
शृङ्गारलक्षणं व्यवहार इति संभोग इति गतार्थं नवरं मान्तरक्तयोः चित्तउदितौ चेष्टात्मगयोः शृङ्गा
रतिहृन्यर्थरक्तयोरिति पदे रतिः कामानुविद्धा प्रीतिः स्थायिभावात्मिका सा प्रकृतिः कारणं यस्य ५ ६

काले अथ शृंगारभेदव्याख्या संभोग इत्यादिका पुनरप्येष इत्यादिना प्रभेदकथनं शृंगारस्य नायकाश्रयइ
१२७ तितस्य गुणानाह इत्युपचार इति ७ सुभग इति सुगमं एतैः षोडशभिर्गुणैर्युक्तो नायकः स्त्रीणां म

इत्युपचारे चतुरः स्वंगः कुलीनो रूपवानरुग्मानी अग्राम्योज्ज्वलवेषो नलक्षणा चेष्टः स्थिरप्रकृतिः
सुभगः कलासु कुशलः करुणस्त्यागी प्रियंवदो दक्षः गम्यासु च विस्रंभी तत्र स्यान्नायकः ख्या
तः ८ एवं स च तत्त्वज्ञः स्यात् दक्षः कुलो दक्षिणः शठो धृष्टः तत्र प्रेमणः स्थैर्यात् दक्षकुलो नम
रमणीकः ९ खण्डयति न पूर्वस्यां सद्भावं गौरवं भयं प्रेम अभिजातोन्यमना अपि ना
यं यो दक्षिणः सोयं १० वक्ति प्रियमप्रियं कृतं विप्रियं तथा निभृतं आचर
ति निरपराधवदसरल चेष्टः शठः स इति ११ कृतविप्रियोप्यशंको यः स्यान्नि
र्भर्त्सितोपि न विलक्ष्यः प्रतिपादितेपि दोषे वक्ति च मिथ्या स धृष्टः १२ भक्तः
सेवत्नमेत्रो नर्मणि निपुणः शुचिः पटुर्वाग्मी चित्तज्ञः प्रतिभावान् न स भवेन्न
भिगम्यत्वात् शृंगाराश्रय इति ८ अथ एवं गुणस्यास्य भेदान् सलक्षणान् आर्याचतुष्टयेनाह ९ १० ११ १२ ग
तार्थं अथ तस्य नर्मसचिवः क्रीडासहायो भवति तस्य चाष्टौ गुणानाह भक्त इति गतार्था आर्या १३ ॥ ॥ १२७

अथतस्यैवभेदानाह गतार्थमार्यादयं १२ १३ अथनायिकानांस्वरूपंभेदान् प्रभेदांश्चभेदप्रभेदस्वरूपं

त्रिविधःसपीठमर्दःप्रथमोथविटोविदूषकस्तद्वत् नायकगुणयुक्तोथचतदनुचरःपीठमर्दोत्र
१४ विटएकदेशविद्योविदूषकःक्रीडनीयकप्रायः निजगुणयुक्तोमूर्खोहासकराकारवेषवचाः
१५ आत्मान्यसर्वसक्कास्तिस्वीलज्जान्वितायथोक्तगुणाः सचिवगुणान्वितसख्यस्तस्यस्वर्नायिका
श्रेमाः १६ शुचिपौराचाररताचरित्रशरणार्जवक्षमायुक्ता आत्मीयातत्रेषामुग्धामध्याप्रगल्भा ॥ २४ ॥
च १७ मुग्धातत्रनवोढानवयौवनजनितमन्मथोत्साहा रतिनैपुणानभिज्ञासाध्वसपिहि॰
तानुरागाच १८ तल्पेपरिहृत्यास्तेसकंपमालिङ्गनेङ्गमपहरति वदनेवचुंवनेसाएष्ठावङ्ग शृं॰
शाङ्कस्फुटंवक्ति १९ अन्यानिषेवमाणोसाकूणयतिनायकेनेङ्गमस्य शोदितिकेवलमथस्मड्डनोपा ति॰
येनलक्षयतिच २० आरूढयौवनभरामध्याविर्भूतमन्मथोत्साहा उद्भिन्नप्रागल्भ्याकिंचिद्धृतमन्द टि॰
नचातुर्या २१ म्रियतेसायस्यास्मरतेविशतीवनायिकाङ्गेषु स्मरनानेसानंदानिमीलिताक्षी
विस्मयतिच २२ कूप्यतितत्रसदोषवक्रोक्त्याप्रतिभिन्नत्तितेधीरा परुषवचोभिरधीरामध्यासा
वाह १६ १७ १८ १९ २० २१ २२ २३ ॥ ॥

काले २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ॥
१२८
128

लब्धायतिः प्रगल्भा रतिकर्मणि पंडिता विमर्दे ता आक्रांतनायकमना निर्व्यूढविलासविस्तारा २४
स्मरते निराकुलासौ द्रवतामिव याति नायकस्यांगे नचतत्रविवेकमलं कोयं काहं किमेतदिति २५
तत्रकुपिता परा धिनि संहृत्याकारमधिकमाद्रियते कोपमपकृत्यास्ते पीरा हि रहस्युदासीना २६ म
ध्यातु साधुवचनैस्तमीदृशं प्रतिभिनत्ति सोल्लुंठैः ताडयति मेद्धपीरा कोपात्संतर्ज्य संतर्ज्य २७ ॥
ज्येष्ठकनिष्ठत्वेन तत्पुनरपि मध्यादिधा प्रगल्भा च स्वीयात्वनन्यभेदाकाव्येषु तथा प्रसिद्धत्वात्
२८ दाक्षिण्यप्रेमभंगाव्यवहारो नायकस्य काव्येषु दृष्टस्तयोरवश्यं सत्त्वेपि न पुनर्भवो भेदः २९
परकीया तु द्वेधा कन्योढा चेति ते द्विजायेते गुरुमदनार्ते नायकमालोक्या कर्ण्य वा सम्यक् ३०
साक्षाच्चित्रे स्वप्ने स्याद्दर्शनमेव वा मिंद्रजाले वा देशे काले भयपासाघु तदाकर्णनं च स्यात् ३१ दृष्टेन
सम्मुखीनेकन्याशंका तिनायके दृष्टा वक्रं न च क्षुवाणं वक्ति सखीं न सखींवासौ ३२ पश्यन्त्य
वीक्षमाणं सस्निग्ध स्फारलोचना सततं दृष्टा न पश्यति तस्मिन्नालिंगति वालमंकगतं ३३ ॥

१२८

३४. ३५ ३६ ३७ ३८ ३९ इत्यार्यापंचविंशतिः स्वगमानवरमात्मीयापरकीयावेश्याचेतिमूलभेद
त्रयं आत्मीयाचमुग्धामध्याप्रगल्भाचेति पुनस्तेयापुनस्तुमध्याप्रगल्भयोर्धीराऽधीरामध्याचेतिप्रत्येक
भेदत्रयं पुनश्चज्येष्ठकनिष्ठत्वेनमध्याप्रगल्भयोर्भेदद्वयंमुग्धात्वेकभेदैवकाव्येषुतथाप्रसिद्धेः अत्रतु।
अनिमित्तंचहसंतीसादरमाभाषतेसर्वोकिमपि रम्यंवानिजमंगंसव्यपदेशंप्रकाशयति ३४ स
ख्यापर्यंकेलंवारचयत्यलकावतंसरसनादि चेष्टांकरोतिविविधामनल्पाेरंगभंगैर्वा ३५ आमो
दापितयैनतत्सर्वंकृतंतेनुरागमापन्ना नायकमभियुंक्तेसाप्रगल्भभावेनपुनरनस्या ३६ उद्भूतानं
दभरामप्लननजघनस्थलादेवसनांच निष्पंदतारनयनाभवतितदालोकनादेव ३७ कन्यापुनरे
भियुंक्तेनस्वयमेनंगतापिद्वरवस्थां सखिन्यानदवस्थांसर्वोत्तनस्मैनिवेदयति ३८ सर्वांगा।
नात्वेश्यासम्यगसौलिप्सतेयनेकामात् निर्गुणागुणिनोनास्यानद्वेष्योनप्रियः कश्चित् ३९
गम्यंनिहूण्यसास्फुटमनुरक्तेवाभियुज्यरंजयति आकृष्टसकलसारंक्रमेणनिःकासयत्येनं
योनिकास्तनर्विवाहितापुनर्भूः परकीयाकन्यापरिणीताचेतिद्विभेदावेश्यात्वेकरूपैवेतितल्लक्षणं
चस्वयंयोजनीयमिति ७ ॥ ॥ ॥

कालं तास्वाधीनपतिर्वासकसज्जाभिसारिकोत्का च अभिसंधिताप्रगल्भाप्रोषितपतिखंडिते चाष्टौ १ यस्यां स्मरतवि॰
१२९ लासैराकृष्टमनाः पतिः स्थितः पार्श्वे विविधक्रीडासक्तो स्वाधीनपतिर्भवेत्तत्र २ निश्चितदयितागमना सज्जि-
तनिजगेहदेहशयनीया ज्ञेया वासकसज्जा प्रियप्रतीक्षितद्वारा ३ अभिसारिकेति सेयं लज्जाभयलाघवा-
129 नवालोच्य अभिसरति या प्राणेशं मदनेन मदेन वाकृष्टा ४ नोपगतः प्राणेशो गुरुणा कार्येण वा विघ्निता-
गमनः यस्याः किं तस्मादिति आकुलचित्ता सोत्कण्ठा ५ अन्यत्र यः कोपं कृत्वा प्रसाद्यमानोऽपि न प्रसन्नेति
यस्याः कृष्णेव दयितो गच्छत्यभिसंधिता सेयम् ६ यस्या जीवितनाथः संकेतकमात्मनैव दत्त्वापि ना-
यातस्तु पागतायां तस्यामिति विप्रलब्धेयम् ७ सेयं प्रोषितनाथा यस्या दयितः प्रयाति परदेशम् ८ ॥
न्नावधिमागमने काले कार्यावसाने वा ८ कार्यान्तरकृतविघ्नो नागच्छत्येव वासकस्यायाः तस्मि॰
न्नीवितनाथो यस्याः सा खण्डिता ज्ञेया ९ पुनरन्यास्तास्तिस्रः संत्युत्तममध्यमाधमभेदात् इति सर्वा॰
च॰ एवैताः शत[illegible]त्रयं चतुरशीतिश्च १० अपराधप्रमितया कुप्यति मुञ्चति च कारणात्कोपम् स्निह्यति नितरां रम-
तो गुणकार्यात्सोत्तमा ज्ञेया ११ आलोच्य दोषमल्पं कुप्यत्यधिकं प्रसीदति विशेषा स्निह्यत्यपि कारणेन च महीय-
सा मध्यमा सेयम् १२ स्निह्यति विनापि हेतुं कुप्यत्यपराधमन्तरेणैव स्वल्पादप्यपकाराद्विरज्यते साधमा प्रोक्ता १३
स्वं विसरति श्रीगोविन्दपराज्ञानमवाप्य निर्वेमितनदाराः पित्रा दत्तासांगः सत्राजिताद्यैर्नगम्यास्तु : १४ म्लेच्छादि १२९

अथसर्वासामपितंविधानकवशाद्भेदांतरमाह ताःसर्वाअभिसारिकाःखंडिताश्चभवंत्यथात्मीयाभेदां
तरमाह तास्तुस्वीयास्वाधीनपतिप्रोषित[illegible]पतिकात्वभेदतोद्वेधा अभिसारिकायालक्षणमभि
सरणक्रमंचाभिधातुमाह ४१ ४२ इत्यार्याद्वयेनागमं ४२ खंडितालक्षणमाह ह्यागमानव
रंतस्याःकथाशरीराणिभूयांसिते नाविप्रलब्धाकलहांतरितेः चांतर्भूतेतल्लक्षणंचेदंयथा यस्या

द्वेधाभिसारिकाखंडितावियोगाद्भवंति तास्तास्स्वीयास्वाधीनपतिःप्रोषितपतिकाश्चनद्वेधा ४१
अभिसारिकातुसायाहूतानाहूतेनवासदैकावा अभिसरतिप्राणेशंकृतसंकेतायथास्थानं ४२
कांच्यादिरणत्कारैर्व्यक्तेलोकेप्रयातिसर्वस्त्री ह्युषितमोन्मोत्वादिह्न्नेस्वीयापरस्त्रीव ४३
यस्याःप्रेमनिरंतरमन्यासंगेनखंडयेत्कांतः साखंडितेतितस्याःकथाशरीराणिभूयांसि ४४

हूतोपिप्रियःप्रेष्यदत्वासंकेतमेववा नागतःकारणेनेहविप्रलब्धातुसास्मृता ईर्ष्याकलहनिःक्रांतो
यस्यानागच्छतिप्रियः सामर्षवशासंतमाकलहांतरितामता एवंविधानिसविधानकवशाद्भूयां
सिकथाशरीराणितस्याभवंति ततश्चयदुक्तंभरतेनयथा तत्रवासकसज्जाचविरहोत्कंठितापिच स्वा
धीनभर्तृकावापिकलहांतरितातथा खंडिताविप्रलब्धाचतथाप्रोषितभर्तृका तथाभिसारिकाचे

वृद्धस्थितानाविति:प्रस्तुता: तदग्रावित्संदर्शितं ७१ ॥

कालं स्वाधीनपतिप्रोषितपतिकयोर्लक्षणमाह ४१ सुगमं ४९ अथाध्यायमुपसंहरन्नन्यथाकरणनिषेध
१३०
130

यस्याः पतिरायत्तः क्रीडारसेन यासमं रत्नैः मुदितः सा स्यात्स्वाधीनपतीर
तिमिंडनलालसासक्ता ४१ सा स्यात्प्रोषितपतिका यस्या देशान्तरं पति
र्यातः नियतानियतावधिको यास्यति यातेस्तु पेक्षितिच ४९ इति
कथितमशेषलक्षणं नायकानामनुगतसचिवानां हीनमध्योत्तमानां
अतिरसिकतयेदं नान्यथाज्ञात्कुर्यात्कविरविहतचेताः साधुका
व्यं विधित्सन् ४७ इति श्रीअलंकारे द्वादशोऽध्यायः १२ ॥

माह प्रकटार्थमेव ४७ इति नमिसाधुविरचिते रुद्रटालंकारटिप्पनके द्वादशोऽध्यायः
समाप्तः १२ ॥

१३०

संभोगः संगतयोरितिवचनात्संपर्क एव नायकयोः शृंगारो न त्वालोकनादीत्याशंक्याह अन्योन्यस्येति
नायकौ दंपती सचित्तौ तुल्यमानसौ यदालोकनवचनोद्यानविहारपुष्पोच्चयजलक्रीडामधुपानताम्बू
लस्मरणादिकं परस्परस्य संवेद्यमनुभवतः स सर्वो न तु निधुवनमात्रं संभोगशृंगार इति प्रवासविप्रले
भस्य संभोगशृंगारत्वनिषेधार्थमाह देशदाविति प्रमदादिनाविपर्यर्थः १ अथास्य संभोगशृंगारस्यानु

अन्योन्यस्य सचित्तावनुभवतो नायकौ यदिह मुदा आलोकनवचनादि स सर्वः संभोगशृंगा
रः १ तत्र भवंति स्त्रीणां दशादि एव हेलसौकुमार्याणां अविरोधिन्यश्चेष्टा देशे काले च सर्वासां
२ दयितस्य सखीमध्ये चेष्टाभिर्मधुरैर्वचोभिरुक्तविचित्रैस्ताः ललितैरंगविकारैः क्रीडंत्यो वानुकुर्वं
ति ३ अनुकार्येण न तन्नार्यो यत्स्वरागाकमेतन्मयीतेस्ता अनुकुर्वती विजहत्यात्माधुर्यं सौकुमा
र्यं च ॥ ४ ॥

भवमाह तत्रेति सुगमं नवरंद्रादि एषमनुवृत्तिः स्नेहः प्रेमसौकुमार्यमाहैवं
देशो वनोद्यानादिः कालो वसंतसरणादिः दयितचेष्टानुकारो नाम लीला स्त्रीणां भवतीति दर्शि
तमाह दयितस्येति सुगमं तत्रापि तदनुकार्यं यदनुकर्तुं शक्यते तेन तल्लक्षणमपि ३ तदाह अ

कुमारीभिति सुगमं कवं तरखयागाजैवसर्थः ४ ॥

काले वेष्टांतराण्याह अपहार इति ५ सुगमं समूकाकालमिति एवं सत्संख्यामल्पमनौचित्यसंव्यवहाराकांखे
१३१ षवचनानामिति ६ तत्काचित्समाख्यैवेनिदर्शयितुमाह समय इति सुगमं अननुकूलाचरणं च सर्व
131 अपहारेवमनानांकुचकलशादिग्रहेरतांतेच अंतर्निह्निताभेदाः पुरुषेषु स्त्रीष्वेववर्तंते ४ सम
कालेनिंदतित्रस्यतिहसत्यहे तल्लज्जेति अस्पृष्यालिंगतिचदर्पितान्यत्रैरिवाविष्टाः ६ समयेत्वरा
वतीनामपदेषु विभूषणादिविन्यासः भवतित्वरणायविभाविततात्पर्यस्मारितालिरपि ७ कु
र्वंतिप्रतिकूलानहासिचयघतप्रियंप्रतिप्रमदाः ततत्क्षणायतासांभवतिमनोभूप्रसादेन ८
हष्टाप्रियमायांततन्मनसस्तेनसंवदंत्योवा मन्मथजनितस्तंभाः प्रतिहतचेष्टाश्च जायंते ९
किमपिप्रियेणपृष्टास्तस्यायद्दत्तसंस्तनसैव साधसमादितकंठाः स्खलितपदैरुत्तरं वा
कैः १० यत्किमपिरहस्यंतमेकर्णेकथयेत्प्रियः सखीमध्ये मृण्वंतिस्फारहशास्तउदितचन
कंटकस्वेदाः ११ ॥

उद्दोषत्वेनप्रसिद्धं ७ त स्यविशेषयागात्वमाह कुर्वंतीति सुगमं ८
नवोढानांस्वरूपमाह दृष्टेति ९ किमिति १० यदिति ११ ॥ १३१

१२ सुगमं ननु किमिति सखीभिः प्रार्थनया नीयते नायकः कथं हठादेव न प्रवर्तयती त्याह सुकुमारा ।

मदनव्याकुलमनसः सकलं तस्यार्थमनवगत्यैव कुर्वाणेन दयिमङ्गः कुर्वन्त्यवधारयन्त्यरव १२ नवप
रिणीतावधोयत्नादपनीयसाध्वसं साशा नीता अपि विस्रंभरहः सुनिर्वृतिभीरमणैः १३ प्रेर्यप्रेर्य
सखीभिर्नीयते वासवेश्म दयितानां तत्संगमाभिलाषेऽप्यसिलज्जाहृतप्रसरैः १४ सुगमं सुकुमा
राः सुकुमाराणामारोप्यायोषितः सदा नतेऽस्य तदनिच्छया प्रवृत्तः शृंगारे नायं नसुरवैः १५ वाग्मी । श
सामप्रवणाग्रादभिराराधयेन्नरो नारी तत्कामिनां महीयोयस्मात्कृंगारसर्वस्व १६ सकविभि
रभियुक्तैः सम्यगालोच्य तत्त्वे त्रिजगति जनं यायत्स्वरूपेण निवद्धं तदिदमिति समस्तं वीत्यकाव्येषु ता
कुर्यात्कविरविरलकीर्तिप्राप्तये तद्वदेव १७ ॥ इति श्रीकाव्यालंकारे त्रयोदशोऽध्यायः १३

इति १५ तस्मात्किं कर्तव्यमित्याह वाग्मीति सुगमं १६ अथाध्यायमुपसंहरन्कवेरुपदेशमाह सुग
मं १७ इति नमिसाधुविरचिते रुद्रटालंकारटिप्पनके त्रयोदशोऽध्यायः १३ ॥

वि॰
काले
१३२
132

अथ संभोगं व्याख्याय विप्रलंभशृंगारं व्याचिख्यासुराह अथेति अथशब्द आनंतर्ये संभोगानंतरं विप्रलं
भोयं शृंगारस्य तुर्विधो भवति कथं चतुर्विध इत्याह प्रथमानुरागादय आत्मा स्वरूपं यस्य तद्भावस्तस्मात् तेनेह
तन्नामप्रकारनिर्देशादेव चातुर्विध्यं लब्धं च तुर्विधग्रहणं च तुर्विधस्याप्यस्य शृंगारत्वनियमार्थं चतुर्विधोपि
शृंगार एवायं केचिद्धि करुणं रसमेव विप्रलंभभेदं करुणमंतर्भावयंति तदसद्वैलक्षण्यात् शुद्धे दि

अथ विप्रलंभनामा शृंगारोयं चतुर्विधो भवति प्रथमानुरागमानप्रवासकरुणात्मकत्वेन १
आलोकनादिमात्रप्ररूढगुरुरागयोरसमागमो नायकयोर्या चेष्टा स प्रथमो विप्रलंभ इति २ हिम
सलिलचंद्रचंदनमृणालकदलीदलादिनिषेवितो दुर्वारस्मरतापोसेवते निंदतः क्षिपतः ३ आ
दावभिलाषः स्याच्चिंता तदनंतरं ततः स्मरणं तद्गुणसंकीर्तनमुद्वेगोथ प्रलापश्च ४

करुणो शृंगारस्यैवैष नवविधनैकरुणविप्रलंभस्तु शृंगार एव यथा कालिदासस्य प्रतिपद्यमनोहरं व पु
:पुनरप्यादिशतादविरुद्धस्थितः रतिहृतिपदेषु कोकिला मधुरालापनिसर्गपंडिता १ अथैषामेव यथाक्र
मं लक्षणमाह आलोकनेति स्रगमं २ तापवक्राग्निवेष्टा आह हिमेति स्रगमं ३ अथ आसमस्त
वकानवस्थाभेदानाह आदाविति ४ ॥ ॥ ॥ १३२

उन्माद इति सुगमं एताश्च दशाः कादंबरीकथायां प्रकटाः मरणांतके चित्रेच्छेति दशांस्तस्याह्निकीदृशः शृंगारः
येहक्केतेत्तमनंतेनवमीदशाप्राप्तस्यानिहृयमस्यमरणमेवदशमीदशास्यात्तेरस्तामप्राप्तेननायकेनतन्निषेधा
उन्मादस्तद्वततोव्याधिर्जेडतानतस्ततोमरणं इत्यमसंयुक्तानांयुक्तानांदशदशास्तेयाः ५ प्रथमनायिको
वरकस्तस्याममज्जयति परिजनेनतस्याः उद्दिश्यहेतमन्यसाम्राप्रादनेनमानेन ६ तस्यपुरतोपथक्रवनतूः।
हीतवाक्यस्यनायिकाविषयां चिरमनुरागेणकथास्वमभिप्रायंप्रकाशयति ७ तदभावेप्रव्राजि।
तामालाकारादियोषितोवापि उभयप्रत्यायिनगिरः कर्मणिसमर्थान्नियुंक्तेच ८ तद्द्वारेणनिवे
दितनिजभावोविदितनायिकाचित्तः विरचितनानाउपचारैःस्वावस्थास्तवकैर्लेखैः ९ सिद्धांच
तोविविक्तैर्हृद्याभ्यकलाभिरिंद्रजालैर्वा योगैरसकृत्क्रमशोविस्मापयतिप्रसंगेषु १० सम्येतयदा
नैवंकथमपिलभ्येतनायिकानाथ्यात् दीनासमस्तोपायःकन्यासन्तदेतिसाधयति ११ ॥
र्थंयतितव्यमितिनिदर्शनार्थंदशमीदशोक्ता ५ पृथक्कलत्रपृथक्त्वरतिप्रयत्नक्रममाह प्रथेति ६ ७ ८
९ गतार्थं १० यदातुसाकन्यानानेनक्रमेणप्राप्यतेतदाकिमित्याह सम्येनेति सुगमं नवरंनायिकातनक
दिकान्तंनतुकन्यायाःस्वीकारक्रमोपदेशोनदुष्टः ८ ॥

कालं
१३३
133

परदाराणां न विरुद्ध एवमन्नापायत्वादित्यत आह नेति १२ सुगमं किमिति १३ ननु पारदारिकत्व
ख्यानमपि न युक्तमित्याह सर्वत इति यत्र शास्त्रे भणितं परदारान गन्तव्यास्तत्रैवोक्तं सर्वत एवात्मानं गो

न हि कुविना परदारा एष्टव्या नापि वोपदेष्टव्याः कर्तव्यत्वेनान्येषां न चैतदुपायोभिधातव्यः १२ किं
त्वनदीयं हृतं काव्यागतयास केवलं वाक्ति आराधयितुं विडंबस्तेन न दोषः कवेरत्र १३ सर्वतए
वात्मानं गोपायेदिति स्वदारागणावस्थः आत्मानं रातिष्यन् प्रवर्तते नायकोप्यत्र १४ मानुः स
नायके यं विकारमायाति नायिका सेर्ष्योद्दिष्टपनायिकोत्तरसंबंधसमुद्भवदोषं १५ गमनेज्या
गान्दोषः प्रतियोषिति मध्यमस्तथालापः प्रलोकनेक्षनीयान्मऽप्याज्यायान्त्यहृदः १६ वस
नादिनायकस्य तदीयमाईहलेनेवनस्याग दोषस्य तथागमकं गोत्रस्खलनं च सखीवचनं १७

पायेदित्येतस्माच्च वचनान्नायकोप्यात्मरक्षार्थमत्र परदारेषु प्रवर्तत इति १८ प्रथमानुरागउक्तोऽथमा
नमाह मान इति सुगमं १५ दोषस्य वसोत्तर विभागानाह गमन इति सुगमं १६ अथ दोषस्यैव लिंगा १३३

सा०द० रसनाट्यसिद्धि सुगमं २ ॥

अथ सौ दोषोत्तानस्तस्याः किं कृतं तस्मादाह देशमिति सुगमं नवरं यदि ज्यायांसो देशकालपात्रप्रसंगाभ
वं तत्साध्यस्तदा कोपः स्यादथ मध्यमास्तदा कृच्छ्रसाध्यः अथ कनीयांसस्तदा सुखसाध्य इति १९ अथ क
पतेदशादयो ज्यायांसस्तस्मादाह ज्वलदिति १९ इतीति सुगमं नवरं नाविनि पूर्वोक्तनायकौ न त्वानुकूलद
क्षिणादिस्तत्रैव नायकः आत्मान्यसर्वसक्तास्तु नायिकास्तत्रानुकूलेन दक्षिणेन च नायकेन ज्यायस्या।

देशे काले पात्रे प्रसंगमवगम्य कर्मेत्यसविशिष्टं जनयति कोपमसाध्यं सुखसाध्यं दुःखसाध्यं वा १९
ज्वलदुज्ज्वलप्रदीपकृतसमोल्कारधूपसुरभिवासगृहं सोपनलेवसवं दिशयानं सुरभिकुसुममरं ॥
१९ इति देशा ज्यायांसो मधुरजनीस्मरमहोदयः कालः पात्रं तु नायकौ तौ ज्यायोमध्यापमावु
कौ २० सकलसखीपरिवृतनतारत्वमभिमुखेनांतस्वशमाच जायेत नायिकाया यत्र सामान्यसं
गोसौ २१ परिहारो वसनादावन्यस्मादागमोन्यदिदमिति वा परिहृतं कृतमस्मिन्नलक्ष्यते नायि

नायिकाया दोषः कृतोऽसाध्यः शठेन धृष्टेन च ज्यायस्याः कृच्छ्रसाध्यः शठेन धृष्टेन च ज्यायस्याः सुखसाध्य
इत्यादि चिंत्यं २० प्रसंगं ज्यायांसमाह सकलेति सुगमं मध्यापुंसोत्तप्रसंगो स्वयमुन्नेयो २१ नव्यप्रसंगदो
षदर्शनेन परिहारो नास्ति लिंगगम्योवत्सोन्याह परिहार इति २२

काले सगमे २३ २४ अथयतःकोपाज्ञायकायऊकृते तदाह ज्यायोभिरिति सगमं २५ अथास्याःकोपस्यसा
१३४ तदत्रत्वन्कृतमिदमितिपरिहारः पूर्वमेववास्तरते शाङ्गांतरनिष्पत्तिगीत्रेसवलनेनकेलिवी २३
134 अभियोज्यायोमयिवाऊपितेयमनेनहेतुनातेन वक्तिसखीनेमिथ्याकिलेतितद्वचसिपरिहारः
२४ ज्यायोभिःसहदोषोज्यायाऊनयस्यसाध्यमतिकोपे तस्मात्क्रियतेसयोमनस्विनीत्यजति
वाक्रुकथं २५ दोषस्यसहायानामालोच्यवलावलंसमेतानां बुध्येतकोपमस्याःसत्वसाध्यंवाकु
साध्यंवा २६ सामप्रदानभेदोप्रणातिरुपेक्षाप्रसंगविभ्रंशः अत्रैतेषडुपायादंडस्थिदहेतिश्रृंगा
रे २७ सामोस्मिपालनीयस्त्वैवधीरावऊदमात्वंच अहमेवदुर्जनोस्मित्रियादिस्त्वंतिवचःसा
म २८ कालेलेकानादिदंद्यादहृदिप्रकारणांत्वन्यत् वेधुमहादिकमितियतद्दानेसाधुत्वमा
स्व २९ तस्यागृहीतवाक्यंपरिजनमावाप्यदानसम्मानैः तेनसदोषःकोपेत्तांवोपयतीसवे
भेदः ३० दैन्येनपादपतनेप्रणातिरुपेक्षावधीरणं तस्याः सहसात्रस्तवयोगोभ्रंशःकोपप्र
ध्यासाध्यविभागःकथंतेयस्मात् दोषस्येति सगमे २६ अथयत्नानेकोपेकेउपायाःप्रयोक्तव्याःके १३४

संगमे २२ अथ प्रवासमाह यास्यतीति संगमे नवरं यथा स्वं वस्य इति करत्वनतिक्रमेणावस्था दशा प्रसा
हृतिप्रवस्यावायस्सस्तथाभूतोऽन्यथा वेति अन्तविवक्षामंतरेणार्थः २३ अथ करुणमाह करु
ण इति नवरं नायको म्रियते नायिका वा तथा नायकोऽस्तंकल्पो नायिका वा भवतीति चत्वारः प्रकाराः

स्फुरत्रयथा पूर्वं स्वसर्वेषु यथोत्तरं तथा बलवान् साध्ये तथा नस्फुट्नाबलवांस्तत्र प्रयोक्तव्यः २२
यास्यति याति गतो यत्परदेशं नायकः प्रवासोऽसौ एष्यत्येनयायातोऽथ यथावस्थान्यथापि स्याद्दानत्
२३ करुणः स विप्रलंभो यत्रान्यतरो म्रियेत नायकयोः यदि वा स्तंकल्पः स्यात्तत्रान्यस्तत्र तेन प्रल
पेत् २४ सर्वेषु जनः स्यात्स्वस्थावयवो विचेतनो ग्लानः अच्छिन्ननयनसलिलः संततं
दीर्घोष्णनिश्वासः २५ ॥

२४ अथ यत्नजैको जीवति तस्य सदृशश्चेष्टो जनो भवतीत्याह सर्वेषुमिति संगमे नवरं सर्वेषु इति च
तुर्थं करुणप्रकारेऽपि निरसोऽयमिति स्त्र विभावानुभावसंयोगाद्भवति न च शृंगारे विभागः संभोग
विप्रलंभादिको भावस्तस्य स्थायी रतिरितरस्तु निर्वेदादिरनुभावस्तु तत्र भवनिश्चीणामित्यादि नोक्तः एवं

काले· अन्योन्यानुरक्तयोर्नार्योः शृंगारोन्यथा त्वेतच्छृंगाराभासः स्यात् शृंगाराभास इति सुगमं नवरं ग्राम्या॰
१३५ भिष्ठेन मेधसा न प्रयोक्तव्यः ३६ अथात्र रीतीनामनुप्रासवृत्तीनां चावसरे विषयविभागमाह रहेति
135

शृंगाराभासः सतु यत्र विरक्तेपि जायते रक्तः एकस्मिन्नपरोसौ नाभाष्येषु प्रयोक्तव्यः ३६ इ
हवैदर्भीरीतिः पांचाली वा विचार्य रचनीया मधुराललितेकविनाकार्यैवृत्तीतशृंगारे ३७
अनुसरति रसानां रस्यतामस्य नान्यः सकलमिदमनेन व्याप्तमाबालवृद्धं तदिति विरचनीयः
सम्यगेष प्रयत्नाद्भवति विरसमेवानेन हीनं हि काव्यं ३८ इति श्रीकाव्यालंकारे चतुर्दशो॰
ध्यायः १४ ॥

सुगमं ३७ अथाध्यायमुपसंहरन्सर्वरसेभ्यः शृंगारस्य प्राधान्यं प्रचिकटयिषुराह अनुसरतीति
सुगमं ३८ इति नमिसाधुविरचिते रुद्रटालंकारटिप्पनके चतुर्दशोध्यायः १४ ॥ १३५

शृंगारं व्याख्यायाधुना वीरादीनां विभावानुभावलक्षणं कारणत्रयं तथा नायकानायकगुणांश्च प्र-
त्येकं क्रमेणाह उत्साहात्मेति । नयेति गतार्थेन वरमुत्साहः स्थायीभावो धर्मदानयुद्धलक्षणं च विषय
त्रयं विभागो नायकगुणा एवानुभावस्तेजो रोण च सामर्थ्यं वलेरिपूणां वलादाक्रमणं पराक्रमः गांभी

उत्साहात्मा वीरः स त्रेधा युद्धधर्मदानेषु विषयेषु भवति तस्मिन्नुत्तमो नायकः ख्यातः १
नयविनयबलपराक्रमगांभीर्यौदार्यशौर्यशौंडीर्यैः युक्तोनुरक्तलोको निर्व्यूढभरो महारंभः
२ करुणः शोकप्रकृतिः शोकश्च भवेद्विपत्तितः प्राप्तेः इष्टस्यानिष्टस्य च वैविध्यविहितो ना-
यकस्तत्र ३ शप्तिन्ननयनसलिलप्रलापवैवर्ण्यमोहनिर्वेदाः क्षितिवेष्टनपरिदेवनविधि-
निंदाश्चेति करुणेस्युः ४ भवति जुगुप्साप्रकृतिर्बीभत्सः सा तु दर्शनाच्छ्रवणात् संकीर्तना-
द्वैंद्रियविषयाणामसहृद्यानां ५ ॥

र्यमलब्धमध्यता दानमभ्युप पत्तिश्च तथा च प्रियभाषणं स्वजने
ष्वपरेष्वपि नदौदार्यं प्रचक्षते समरैकरसिकत्वं शौर्यं सत्यपि त्यागकारणे योग्यकार्यस्यात्यागः शौंडी-
र्यं येषां मित्यर्थः २ अथ करुणः करुणा इति ३ शप्तिन्नेति स्वगमनवैरं शोकः स्थायिभावः इष्टानिष्टवि-

पत्तिप्राप्तीविभागोछिन्ननयनाश्रुप्रभृ निरनुभावः ४ अथ
वीभत्सः भवतीति ५ ॥

काले १३९ हृदिति सगमे नवरं जुगुप्सास्थायिभावो विभावस्त्वहृद्यदर्शनादिरनुभावो हृल्लेखनादिः हृल्ले-
१३९ खनहृदयकंपः ६ अथ भयानकः संभवतीति ७ दिगिति सगमे नवरं भयस्थायिभावो घोरश-
136 ब्दादिर्विभावः दिक्प्रेक्षणादिरनुभावः ८ अथाद्भुतः स्यादिति ९ नयनेति सगमे नवरं वि-

हृल्लेखननिष्ठीवनमुखकूणनसर्वगात्रसंहाराः उद्वेगाः संत्यस्मिन्नाभीर्याज्ञोत्रमानांत ६
संभवति भयप्रकृतिर्भयानको भयमतीवघोरेभ्यः शब्दादिभ्यस्तस्य च नीचस्त्रीबालनायकता
७ दिक्प्रेक्षणमुखशोषणावैवर्ण्यस्वेदगद्गदत्रासाः करचरणकंपसंभ्रममोहाश्च भयानके
संति ८ स्यादेष विस्मयात्मा रसोद्भुतो विस्मयोप्यसंभाव्यात् स्वयमनुभूतादर्शनादनुभूयान्येन
वा कथितात् ९ नयनविकासो वाष्पः पुलकः स्वेदोनिमेषनयनत्व संभ्रमगद्गदवाणी सा-
धुवादास्सुद्भुते संति १० हासाद्धासप्रकृतिर्हासो विकृतांगवेषचेष्टाभ्यः भवति परस्याभ्यः स-
चभूयस्त्रीनीचबालगतः ११ नयनकपोलविकासो किंचिल्लक्ष्यद्विजोप्यसो मद्रता मध्यानां

स्मयः स्थायिभावो विभावस्त्वसंभाव्यानुभवादिरनुभावो नयनविकासादिः १० अथ हास्यः हास्य इ-
ति ११ सगमे नयनेति नवरं हासः स्थायिभावो विभावस्तु विकृतांगवेषादिरनुभावो नयनक

१२९

अथ रौद्रः रौद्र इति तत्रेति सुगमं नवरं क्रोधः स्थायिभावो विभावो रिपुकृतपराभवादिरनुभावो निजांसो
स्फालनादिः १३ १४ अथ शान्तः सम्यगिति १५ जन्मेति सुगमं नवरं सम्यग्ज्ञानं स्थायिभावो विभा
गस्तु शब्दादिविषयस्वरूपमनुभावो जन्मादित्रासादयः केचिच्छान्तस्य रसत्वं नेष्टं तदयुक्तं भावादिका

रौद्रः क्रोधप्रकृतिः क्रोधो रिपुकृतात्पराभवाद्भवति तत्र सदारुणचेष्टः सामर्षो नायकोऽत्युग्रः १३
तत्र निजांसास्फालनविषमभ्रुकुटीदशनाग्रयुधोक्षेपाः संतिस्वशक्तिश्लाघाप्रतिसाप्रतिपत्ता
क्षेपवल्गनानि १४ सम्यग्ज्ञानप्रकृतिः शान्तो विगतेच्छो नायको भवति सम्यग्ज्ञानं विषये
तमसो रागस्यापगमात् १५ जन्मजरामरणादित्रासो वैरस्यवासना विषये सुखदुःख
योरनिच्छाद्वेषाविति तत्र जायते १६ स्नेहप्रकृतिः प्रेयान् संगतशीलार्यनायको भवति
स्नेहस्तु साहचर्यात्प्रकृतेरुपचारसंबन्धात् १७ निर्व्याजमनोहृतिसनर्मसद्भावपेशला
लापाः अन्योन्यं प्रति सुहृदो व्यवहारोऽयं मतस्तत्र १८ प्रस्यंदिप्रमदाश्रुः स्निग्धस्फा
रलोचनालोकः आर्द्रान्तःकरणतया स्नेहपदे भवति सर्वत्र १९ ॥

रणानामत्रापि विघ्नमानत्वादेवं प्रेयोऽपि द्रष्टव्यमिति १६ अथ प्रेयान् स्नेहेति १७ १८ सुगमं
नवरं स्नेहः स्थायिभावो विभावः साहचर्यादिरनुभवः प्रस्यंदिप्रमदाश्रुप्रभृतिः १९ ॥

काले
१३८
137

अथ वीरादिषु रीतिनियममाह वैदर्भीति प्रेयःकरुणभयानकाद्भुतेषु चतुर्षु रसेषु वैदर्भीपांचाल्ली
द्वे निरीति द्वयं कुर्यात् तथा रौद्रे रसे लाटीयागौडीये वक्तव्ये शेषरसेषु न रीतिनियमः सर्वा अपि क
थं कार्या इत्याह यथौचित्यमित्यौचित्यं रसस्वरूपपरिपोषस्तदनतिक्रमेणेत्यर्थः रसानामलंका
राणां च लक्षणस्य मात्रयापि न्यूनत्वे तदाभासता बोद्धव्या २० अथाध्यायमुपसंहरंस्तद्रचनाक्रममाह

वैदर्भीपांचाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः लाटीयागौडीये रौद्रे कुर्याद्यथौचित्यं २०
एते रसा रसवतो रमयंति पुंसः सम्यग्विभज्य रचिताश्चतुरेण चारु यस्मादिमाँ गम्य न सर्व ननधि २
रम्यं काव्यं विधातुमलमत्र तदाद्रियेत २१ इति श्रीकाव्यालंकारे पंचदशोऽध्यायः १५

एत इति एते रसाः सम्यग्विभज्य चतुरेण कविना चारु यथा भवन्ति तथा रचिताः संतो रसिकान् पुंसो
रमयंति यस्मात्तथैमाननधिगम्य अविज्ञाय सर्वथा रम्यं काव्यं विधातुं कविर्नालं न समर्थः तत्त।
स्मादत्रैतेष्वादरो विधेयो नादरं कुर्यात् २१ ॥ इति श्रीनमिसाधुविरचिते रुद्रटालंकारटिप्पनके
पंचदशोऽध्यायः १५ ॥ १३८

नत्रकाव्येन क्रियते सरसानामवगमश्चतुर्वर्गस्य सुकरं तत्र कथं चतुर्वर्गः कथं च तं रसैः सह निबध्नीयादि
त्याह जगतीति सुगमं प्रबंधेष्विमं सके १ अथ के ते प्रबंधाः कियंतो वेत्येतन्मुखेन महाकाव्यादिलक्ष
णं वक्तुमाह संतीति द्विधा प्रबंधाः संति प्रबध्यते नायकचरितमनेनेति कृत्वा केचन काव्यकथा
ख्यायिकादयः इति आदिग्रहणात् सकलकनाटकाद्यर्थं केचन प्रबंधाः काव्यं कविकर्मणि कथ्यते द्विधा उ
त्पाद्यानुत्पाद्यभेदात् तथा महल्लघुत्वेन भूयोपि पुनरप्युत्पाद्या महांतो लघवश्चानुत्पाद्या अपि महांतो
जगति च चतुर्वर्गैः इति धर्मार्थकाममोक्षाणां सम्यक् ज्ञानमिदं ह्यत्र सम्यग्निश्चानु प्रबंधेषु १=
संति द्विधा प्रबंधाः काव्यकथाख्यायिकादयः काव्ये उत्पाद्यानुत्पाद्या महल्लघुत्वेन भूयोपि २
तत्रोत्पाद्या येषां शरीरमुत्पादयेत् कविः सकलं कल्पितयुक्त्यान्वितं नायकमपि तत्र च विकुर्या
ल्लघुवपुस्तथा अथोत्पाद्यलक्षणमाह तत्रेति तत्र काव्यादिषु मध्ये उत्पाद्या स्युर्येषां शरीरमिति वृत्तं
सकलं कविरुत्पादयेत् नायकं प्रसिद्धं गृहीत्वा तस्य व्यवहारः सर्व एव पूर्वं न निबध्यत इत्यर्थः यथा
माघकाव्यप्रकारांतरमाह कल्पितयुक्त्या घटमाना निर्यस्तमिह भूतं नायकमपि तत्र च विकु
र्यात् तामिति ह तत्र च तिलकमंजरी बाणकथा वा निदर्शनं ३ ॥

काले
१३८
138

अथानुत्पाद्यलक्षणमाह । पंचरमिति तेषु काव्यादिमध्ये तेऽनुत्पाद्याः येषां पंजरं कथाशरीरमखि
लं सर्वमितिहासादिप्रसिद्धं रामायणादिकथाप्रसिद्धं कविः स्ववाचा परिपूरयेद्वदेदित्यर्थः यथा जैन
चरिते अथवा तदेकदेशं वा इतिहासाद्येकदेशं वा स्ववाचा यत्र पूरयेत्तदप्यनुत्पाद्यं यथा किरा
तार्जुनीयं काव्यं ४ अथ महान्तः तत्रेति सुगमं नवरं काव्यस्थानानि पुष्पोच्चयजलक्रीडा

पंजरमितिहासादिप्रसिद्धमखिलं तदेकदेशं वा परिपूरयेत्स्ववाचा यत्र कविस्ते त्वनुत्पा
द्याः ४ तत्र महान्तो येषु वितन्यतेऽभिधीयते चतुर्वर्गः सर्वे रसाः क्रियन्ते काव्यस्थानानि स
र्वाणि ५ ते लघवो विज्ञेया येष्वन्यतमो भवेच्चतुर्वर्गात् असमग्रानेकरसा ये च समग्रैकरसयुक्ताः ६
तत्रोत्पाद्ये पूर्वं सन्नगरीवर्णनं महाकाव्ये कुर्वीत तदनु तस्यां नायकवंशप्रशंसां च ७ ॥

दीनि भण्यन्ते ५ अथ लघवः तदिति सुगमं नवरं ते मेघदूतादयो लघवो महान्तः शिशुपालवधादयः
अथानुत्पाद्येषु पुराणादिक्रमेणैव तिष्ठन्निर्बन्धः केवलं तत्र कविः स्ववाचा चतुर्वर्गरसकाव्यस्था
नुवर्णनेन मस्कारं सर्वं करोतीति न तद्विषयनिबन्धोपदेशो जायते । येषु तूत्पाद्यास्तत्र कथं नि
बन्धः सम्यगुपदिश्यत इत्याशयतः इति ६ तन्निर्बन्धक्रमोपदेशमाह तत्रेति ७ ॥ १३८

तत्र त्रिवर्गसक्तं समिद्धशक्तित्रयं च सर्वगुणं । रक्तसमस्तप्रकृतिं विजिगीषुं नायकं न्यसेत् ८ विधिव
त्परिपालयतः सकलं राज्यं च राजवृत्तेन तस्य कदाचिदुपेतं शरदादिं वर्णयेत्समयं ९ सार्थं मित्रा
र्थं वा परमोदिसोपायिष्णुतल्लस्य कृत्यादिषु मन्त्रमंप्रतिपत्तं वर्णयेद्गुणिनं १० सचरान्तहूतान्दूताकृतो
ऽपि वा स्पृणवतो ऽरिकार्याणि कुर्वीत मदसिरान्ते दोभे क्रोपेतं हु चिन्तनगिरं ११ सेनं समसमं सविवैर्नि
श्चिमचदंडसाध्यतांपशान्तोः तदापयेत्प्रयाणे हतेवाद्बुष्यतेन्नरवे १२ अथ नायकप्रयाणे
नागरिकान्तोभजनपदादिनदीः अटवीकाननसरसीमरुजलधिद्वीपभुवनानि १३ स्कंधा
वारनिवेशं क्रीडां यूनां यथायथं तेषु रव्यस्तमयं संध्यां सन्तमसमथोदयं शशिनः १४ रजनीं त
त्र च यूनां समाजसंगीतपानशृङ्गारान् इति वर्णयेत्प्रसंगात्कथां च भूयोऽनुवध्नीयात् १५ प्र
ति नायकमपि तद्वत्तदभिमुखमक्षमाणमायान्तं अभिदध्यात्कार्यवशान्नगरीरोधस्थितं
वापि १६ योद्धव्यं प्रातरिति प्रवंधमधुपीतिर्निशिकलत्रेभ्यः स्वैर्यं विशोकमानानसंदे
शान्दापयेत्सुभटान् १७ ॥

८ ९ ११ ११ १२ १३ १४ १५ १६ १७ ॥

काले ३८

139

सेनयेति नगरार्णवशैलेत्यादि द्विषिति कल्पेणगोत्रजन्मादि शाह्नाङ्कि त्रिमादिस्तथा संसृष्टानि शिष्ठिस्तवेन
गातभूतः कारितार्थो द्रष्टव्याः तथा भिन्नकर्तृकत्वात् कानस्यात् नायकमुखेन कविरेव मंत्रयते नि
श्चितानि चेति केचित् तथा नद्यः सरितः अटवी निर्जनो देशः काननमुद्यानवनं सरसो महान्ति सरां
सि मरुर्निर्जलो देशः द्वीपं जलमध्यस्थभूप्रदेशो भुवनानि लोकान्तराणि तथा सूनोदयपतीनां क्रीडा
सा च वनेषु क्रीडा नदीषु जलकेलिरट्व्या विहारश्चेत्यादिका तथा सूनोः समाजः संगमः संगीतगोयं
संतत्यक्तनवरहंसविस्मयपुष्पमानयोरुभयोः कृच्छ्रेण साधुकर्यादभ्युदयेनायकस्याते १८
सर्गाभिधानि चास्मिन्नवान्तरप्रकरणानि कुर्वीत संधीनपि तस्मिन्शिष्टांस्तेषामन्योन्यसंबंधात् १९
पानकं सरकं शृंगारः सुरतादिः तथा कलत्रेभ्यः सुभटान्संदेशान्प्रदापयेत् कथं दापयेत् प्रवे
येन मधुपीतिर्मधुपानं यत्र कर्मणि मधुपानमपि कुर्वन्तरस्याद्यो द्रष्टव्यश्चान्तरिति तथा नायकस्येति
नायकस्यैव वृषिजयं कुर्यान्नविपक्षस्येति सूचनार्थं १८ अथ किमयं प्रबंधोऽनवच्छेदपद्यकर्तव्यो ने
त्याह सर्गेति सर्गमेतावदवान्तरसर्गाभिधानि सर्गनामकानि यतः सर्गसंबंधो महाकाव्यमित्युक्तं
तथा संधीन्मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्यान्भरतोक्तान्सुश्लिष्टान्सुरचनान् ३८

महाकाव्यलक्षणमाख्यायिकालक्षणमाह श्लोकैरिति सुगमं नवरं संक्षेपेण निजं कुलमभिदध्या
त्वाख्यायिकायामिव विस्तरेण स्वं चेति चकारोऽनुक्तसमुच्चये तेन सज्जनखलस्तुतिनिंदादिकं चाभिद
ध्यादिति सूच्यते २० ततश्च सानुप्रासेनेति सुगमं नवरं भूयोलघ्वक्षरेण २१ प्रकारान्तरमाह आदाविति
गतार्थं नवरं लघुतावत्संधानं लाघवयुक्तं संधानं यत्र कथांतरे अथवादौ तावत्कथांतरं न्यस्येत् ततो ।

श्लोकैर्महाकथायामिष्टान्देवान्गुरून्नमस्कृत्य संक्षेपेण निजं कुलमभिदध्यात्स्वं च कर्तृतया
२० सानुप्रासेन ततो भूयो लघ्वक्षरेण गद्येन रचयेत्कथाशरीरं पुरेव पुरवर्णकप्रभृतीन् २१
आदौ कथान्तरं वा तस्यां न्यस्येत्प्रपंचितं सम्यक् लघुतावत्संधानं प्रक्रान्तकथावताराय २२
कन्यालाभफलां वा सम्यग्विन्यस्य सकलशृंगारां इति संस्कृतेन कुर्यात्कथामगद्येन चान्येन २३

लघु शीघ्रं प्रक्रान्तकथावतारायसंधानमिति यथा कादंबर्यां २२ तथा अथेति वाशब्दः पक्षान्तरसू
चकस्तेन राज्यलाभादिफलमपि क्वचित् सम्यग्विन्यस्य सकलशृंगारामित्यनेन शृंगाररसस्य प्राधान्येन
निबंधनीयत्वमुक्तं भवति इत्येवं संस्कृतेन कथां कुर्यादन्येन प्राकृतादिभाषान्तरेणाल्पगद्येन गाथाभिः प्र

भूर्तंकथाकृतकथावर्णकविधिसर्गः २३ ॥

काल
१५
140

आख्यायिकालक्षणमाह पूर्ववदिति तद्वन्निति सुगमं २० २१ आख्यायिकायाः पूर्वलक्षणशेषमाह अ
थेति एवाभिन्नक्रमेण तत्स्वायमर्थोऽप्युच्यते न केवलं विना पद्यैव कथाख्यायिकापि तथैव गद्यैव गद्येन रचनीयान्तरव

पूर्ववदेव नमस्कृतदेवगुरूनोत्सहेत स्थितेष्वेषु काव्यं कर्तुमिति कवीन् शंसेदाख्यायिकायां तु २०
तदनु नृपे वा भक्तिं परगुणसंकीर्तनेन वा व्यसनं अन्यस्मात्तत्करणे कारणमाक्लिष्टमभिदध्यात् २१
अथ तेन कथैव यथा रचनीयाख्यायिकापि गद्येन निजवंशं स्वं चास्यामभिदध्यादुत्तमस्येव २२ क
र्यादत्रोच्छ्वासान् सर्गवदेषां मुखेषु नाऽपरता द्वे द्वे वार्ये श्लिष्टे सामान्यार्थे तदर्थाय २३ संशया
यांसाऽवसरे भुवनोद्भूतस्य वा परोक्षस्य अर्थस्य भाविनस्तत्प्रस्तावस्यापि निश्चितये २४ संशया
पितः प्रस्तुतस्यावसरेणैव पाठ्योऽत्र कवित् अन्योक्तिसमासोक्तिश्लेषाणामेकमन्यतमं वा २५

पारणे तोनिजवंशमात्मनोऽन्वे गद्येनैवास्यामभिदध्याद्यथा हर्षचरिते २२ अपि च कुर्यादिति सु
गमं नवरेति दर्शयन् प्रस्तावनाय २३ संशयेति २४ २५ ॥

१५

वर्तमानस्यातीतस्य च परोक्षस्य भाविनस्त्व प्रत्यक्षस्यापि संदेहकाय्यनावसरे सति निश्चयायकं चिन्हाण्णि नम
वसेरेणैवान्योक्तिसमासोक्तिश्लेषाणामध्यादेकस्य भयंवाले कारंपाठ्य तत्र वाचार्यादिच्छेदः अर्थात् ९ एवं
काव्यादिद्वयस्य लक्षणमाख्याय तच्छेषमाह साभिप्रायेति सुगमं नवरंविरुद्धमिव नतविरुद्धं विषयो
तत्रच्छेदः अर्थादार्थापरवक्त्रस्य च्छिन्नाग्राणां प्रन्यतमे वस्तु व गाद्यवान्यन्मालिनीप्रायं १० साभि
प्रायं किंचिद्विरुद्धमिव वस्तु सत्प्रसंगेन प्रोतः कथा अर्थादिविषयेषु प्रवंधेषु ११ अर्थाद्भुद
यो नतराजनु शत्रादि नायकस्यापि प्रमिदध्यादेषु नद्या मोक्षं च मुनि प्रसंगेन १२ अर्थात् तत्वदेका
वैवर्त्तकथा यो च नायकं कार्येवं प्रापञ्जन्तं च धूर्योहिज सेवक सार्थवाहादिं १३ प्रचरस
करुणां वा अर्थाद्यथवा प्रवासमङ्गारं प्रथमानुरागमथवा पुनरंते नायकाभ्युदयं १४ नैतदत्र
त्वाघेषु तत्र व्यभिधीयते यथाहृत प्रलेषु महत्सु च वा नद्विषयो नायकमुपदेशः १५ ॥

तिकाव्यकथाख्यायिकास्तु ३१ सुगमं ३२ प्रथलक्षणं काव्यादीनां लक्षणमाह सुगमं ३३ ३४ अथ
किमेतल्लक्षणं सर्वेषामपि काव्यादीनां सामान्यस्यात् नेत्याह सुगमं ३५ ॥

काले अथ काव्यकथाख्यायिकादयस्त्वत्रादिग्रहणसंगृहीतं दर्शयितुमाह अन्यदिति सर्गमे तच्चयस्यामीय
१५१ रकुलवर्णने यशोर्थं क्रियते सा प्रशस्तिर्यत्र च पंचादीनां चतुर्दशांतानां श्लोकानां वाक्यार्थः परिसमाप्य
151 ते तत्कुलकमादिग्रहणादेकस्मिन् छंदसि वाक्यसमाप्तौ मुक्तकं द्वयोः संदानितकं त्रिषु विशेषकं च
तसृषु कालापकं तथा मुक्तकानामेव प्रबंधकोपनिबंधः पर्यायतया गः कोशः तथा बहूनां छंदसामेक

अन्यद्घूर्णिकमात्रेण प्रशस्तिकुलकादिना नाटकाद्यन्यत्
काव्यं तद्वत्क्रमाद्भाषं विचित्रमन्यत्र चाभिहितं ३९ ॥

वाक्यत्वेन श्लोकानां च समूहावस्थाने पर्यायकथा भूयोप्याह नाटकाद्यन्यदित्यत्र भरतादावभिहितं नाट
कादीत्यत्रादिशब्दान्नाटकप्रकरणेहामृगसमवकारभाणव्यायोगडिमवीथीप्रहसनानि संगृहः
तद्वत्क्रमाद्भाषं च वक्ष्यमाणाभिर्भाषाभिर्निबध्यते विचित्रं च नानामपि संप्रयोगाभिनयादिप्रक्रमादिति ३९ ॥ १५१

महाकाव्यादिलक्षणमभिधायेदानीं काव्यगुणातिशयविवक्षायां माकश्चिदसंभवि वोचदिति।
तन्निषेधार्थमाह क्रलेति सगम १७ ननु भरतहनूमत्प्रभृतीनां सर्वमेतत् घटते ततस्तद्यथा
तेषां तथात्मसामर्थ्यविषयतीतिकोदोष इत्याह यदीति सगमं नवांस्तु रादिमत्र्यैः सुरादिप्रयाणै
क्रशलैलाद्युनिपीनां तद्व्यावर्णनं मनुष्येण आत्मीययैव शक्त्या समद्वीपावनिक्रमणं ३७
यपितल्लेखितवंतो भरतप्रायाः क्रलाचलाद्युनिपीन तेषां सुरादिमत्र्यैः सगादासनवि
मानानि ३८ शक्तिमनजातेषामसुरादिवपेः पिकारासुरादिभ्यः आसीतेहि सूत्रयानी
येतेस्मामरैः सामिति ३९ दारिद्र्यव्याधिजराशीतोष्णाद्युद्भवातिदुःखानि बीभत्सं च विद
ध्यादन्यत्र न भारतात् वर्षात् ४० वर्षेष्वन्येषु पुनर्मणिकनकमयी मही हितसलभ विग
तव्याधिजराहहालतायुषो लोकाः ४१
आदिशब्दात्सिद्धविद्याधरः किंनरगंधर्वादिसंग्रहः ४८
ननु च समस्तविनादिहीनत्वात् मनुष्याणां कथं सुरादिभिः सह संगोपीत्याह शक्तिरिति सगमं नवरं
वशाद्धा हेतो ४९ भूयोप्याह दारिद्र्येति सगमं नवरं भारते भरत तेन मन्यत्र निलाहुलादोक

नेतविषया ७, दिग्माह वर्णयति सगमं, गवंहेङ्गाल
प्रीतिसमाहितौ ५९ ॥

काले १४२

142

अथ शास्त्रपरिसमाप्तौ मंगलार्थं देवताः संकीर्तयन्नाह जयतीति सुगमं इति श्रीपंडितनमिसा
जयति जननमानिष्ठाडुद्दवंनी भवानी जयति निजविभूतिव्याप्तविश्वो मुरारिः जयति च गजवक्त्रः
सोत्र यस्य प्रसादादुपशमितसमस्तो विघ्नवर्गोपसर्गः ४२ इति श्रीकाव्यालंकारे षोडशोऽध्यायः १६
एवं रुद्रटकाव्यालंकृतिटिप्पनकविरचनात् पुण्यं यदवापि मया तेनास्तु जनः परोपकृतिकृद्या
त् १ थारापद्रपुरीयगच्छतिलकः शाडिम्बसीमाभवत् सूरिर्भूरिगुणैकमंदिरमिह श्रीशालिभद्र
सिंधुः तस्मादाप्तजयस्य देवनमिना संतेयसप्रदलिणः शुभमंत्रयप्रिधापि कृत्यवरचितं सहिपंत
नच्छदः २ यदनवबोधाद्वितथं विहितं किमपीह तन्महामतिभिः संशोधनीयमखिलं रचिताञ्ज
लिरेष याचेऽहं ३ सहस्रत्रयमन्यूनं ग्रंथोयं येडिशतोऽखिलः द्वात्रिंशदक्षरश्लोकप्रमाणेन सु
निश्चितं ४ पंचविंशतिसंयुक्तैरेकादशसमाशतैः विक्रमात्समतिक्रांतैः प्रावृषीदं समर्थितं
५ मूलसूत्रव्यतिरेकेण मूलसूत्रं च तत्समं शतान्यष्टौ सपिंकानि ६ श्रीकृष्णाय नमः भक्तिः कृष्णम
तिर्दृढं शांकरिभागेरतिः श्रुते दया सर्वेषु भूतेषु स्यान्मे जन्मनि जन्मनि १ संसम मनोरमा कामाः
संसारस्याविभूतयः किंतु मत्तांगनापांगभंगलोलं हि जीवितम् २ ॥
॥ इति विरचिते रुद्रटालंकारटिप्पनके षोडशोऽध्यायः १६ रुद्रनवसप्तपरिमितशरदि श्रीविक्रमादित्याद्

